Website : www.kamakoti.org.
email : kanchimutt@gmail.com



☎ : 044-27222115
Acts : 044-27224236
Fax : 044-27224305

II Sri Chandramouleeswaraya Nama: ||
Sri Sankara Bhaghavadpadacharya Paramparagatha Moolamnaya Sarvajnapeeta
His Holiness Sri Kanchi Kamakoti Peetadhipathi
**JAGADGURU SRI SANKARACHARYA SWAMIGAL**
**Srimatam Samsthanam**
**No. 1, Salai Street, KANCHEEPURAM - 631 502.**

Date : ..................................

श्रीपरमेश्वरस्य निःश्वासभूताः वेदाः ईश्वररूपा एवेति मन्यन्ते ऋषयः। उक्तञ्च - वेदः शिवः शिवो वेदः वेदाध्यायी सदाशिवः इति। अत एव श्रुतिः वेदविदं सर्वदेवतास्वरूपेण वर्णयति - यावतीर्वै देवताः ताः सर्वा वेदविदि ब्राह्मणे वसन्ति इति। यथा ईश्वरोऽनन्तः तथा वेदा अपि अनन्ताः। ब्रह्म चानन्तम् इति घुष्यते - "सत्यं ज्ञानमनन्तं ब्रह्म" इति। ईदृशमनन्तं वेदं श्रीव्यासाचार्याः चतुर्धा व्यभजन् इति पुराणेषु श्रूयते।

एषां बोध्यविषये सर्वेषां समत्वेऽपि, क्रमगणनायां बहुधा ऋग्वेदस्य अग्रस्थानत्वं विद्यारण्यैः वेदभाष्ये निरूपितम्। समस्तस्य वेदराशेः धर्मब्रह्मोभयविषयकत्वमेव इष्यते। तयोर्मध्ये ब्रह्म उपेयत्वेन धर्मश्चोपायत्वेन वर्तते इति सर्वसम्मतम्। अत एव भगवद्गीतायां - "सर्वे वेदा यत्पदमामनन्ति" इत्युक्तम्। काण्डानुग्रमणिकायाञ्च श्रीबोधायनाचार्यैरवोचि -

रहस्यमूलो ऋक्पर्णः यजुःपुष्पप्रवालवान्।
यज्ञकर्मफलः श्रीमान् विद्वद्भ्रमरसेवितः॥
छन्दःस्कन्धः शाखाशाखो ब्राह्मो वृक्षः साक्षादेषः॥ इति। अपि च स्मार्तकर्मसु अभियुक्तैः

काण्डद्वयोपपाद्याय कर्मब्रह्मस्वरूपिणे।
स्वर्गापवर्गरूपाय यज्ञेशाय नमो नमः॥

इति वेदानां सर्वेषां ब्रह्मैकबोधनपरत्वं निगद्यते। अत एव कर्मकाण्डगतेषु वाक्येषु प्रकृतकर्मबोधनेऽपि आध्यात्मिकब्रह्मबोधकता केषुचित् मन्त्रेषु श्रीविद्यारण्यैः उक्ता। एवंरीत्या तत्र तत्र मन्त्रेषु ऋग्वेदादिगतेषु पूर्वप्रकृतकर्मदेवतादिबोधनपरतया भाष्यं विरच्य अध्यात्मपरत्वेनापि व्यधायि।

ईदृशीं परिपाटीं मनसि निधाय, बहुग्रन्थावलोकनपूर्वकं बहुधा आमूलचूडमालोड्य महता प्रयासेन सम्पूर्णस्यापि ऋग्वेदस्य ध्वन्याख्यशैल्या ब्रह्मप्रतिपादनप्रवणत्वं सम्भवतीति द्योतयितुं एतद्ग्रन्थकारैः श्रीरङ्गनाथसुधीभिः श्रीकृष्णप्रेमिमहाभागात्मजैः ग्रन्थमिदं प्रणीतम्। सभक्तिश्रद्धं लोकोत्तरपरिश्रमं विधाय एतत्प्रणयनेन लुप्तप्रायनूत्नव्याख्यानरचनापरम्परा संवर्धितेति महदिदं नः प्रमोदस्थानम्।

ऋग्वेदस्य प्रतिमन्त्रं अध्यात्मपरत्वेन योजनमितीदं कर्म अनितरसाधारणम्। एतादृशं रङ्गनाथोपज्ञं कर्म दृष्ट्वा श्रीचरणैः अमन्दानन्दोऽन्वभावि। ध्वनिदीपिकाख्यस्य ग्रन्थस्य रचयितुः इतोऽप्येतादृशलोकोपकारकज्ञानाभिवर्धककृतिषु श्रद्धाभिवृद्धिः श्रीमहात्रिपुरसुन्दरीसमेतचन्द्रमौलीश्वरकृपया सञ्जायतामित्याशास्महे।

इति नारायणस्मृतिः।

शार्वरि-कार्तिक-कृष्ण- चतुर्थी
यात्रास्थानम्- श्रीपादुकामण्डपम्, काञ्चीमठशाखा, तिरुपति